# Narasimha stuti by Shukracharya

# નરસિંહસ્તુતી શુક્રાચાર્યપ્રોક્ત નરસિંહપુરાણે

## Document Information

Text title : narasiMhastuti shukrAchAryaproktaM narasiMhapurANe

File name : narasiMhastutishukrAchAryaproktaNP.itx

Category : vishhnu, dashAvatAra, stotra, vishnu

Location : doc_vishhnu

Proofread by : Singanallur Ganesan singanallur at gmail.com

Translated by : https://archive.org/details/NarsimhaPuranGitapress

Description-comments : Narasimhapurana adhyAya 55

Latest update : June 6, 2013

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# નરસિંહસ્તુતી શુક્રાચાર્યપ્રોક્ત નરસિંહપુરાણે

માર્કણ્ડેય ઉવાચ
વામનેન સ વિદ્ધાક્ષો બહુતીર્થેષુ ભાર્ગવઃ ।
જાહ્નવીસલિલે સ્થિત્વા દેવમભ્યર્ચ્ય વામનમ્ ॥ ૧॥

ઊર્ધ્વબાહુઃ સ દેવેશં શંખચક્રગદાધરમ્ ।
હૃદિ સંચિન્ત્ય તુષ્ટાવ નરસિંહં સનાતનમ્ ॥ ૨॥

શુક્ર ઉવાચ
નમામિ દેવં વિશ્વેશં વામનં વિષ્ણુરૂપિણમ્ ।
બલિદર્પહરં શાન્તં શાશ્વતં પુરુષોત્તમમ્ ॥ ૩॥

ધીરં શૂરં મહાદેવં શઙ્ખચક્રગદાધરમ્ ।
વિશુદ્ધં જ્ઞાનસમ્પન્નં નમામિ હરિમચ્યુતમ્ ॥ ૪॥

સર્વશક્તિમયં દેવં સર્વગં સર્વભાવનમ્ ।
અનાદિમજરં નિત્યં નમામિ ગરુડધ્વજમ્ ॥ ૫॥

સુરાસુરૈર્ભક્તિમદ્ભિઃ સ્તુતો નારાયણઃ સદા ।
પૂજિતં ચ હૃષીકેશં તં નમામિ જગદ્ગુરુમ્ ॥ ૬॥

હૃદિ સંકલ્પ્ય યદ્રૂપં ધ્યાયન્તિ યતયઃ સદા ।
જ્યોતીરૂપમનૌપમ્યં નરસિંહં નમામ્યહમ્ ॥ ૭॥

ન જાનન્તિ પરં રૂપં બ્રહ્માદ્યા દેવતાગણાઃ ।
યસ્યાવતારરૂપાણિ સમર્ચન્તિ નમામિ તમ્ ॥ ૮॥

એતત્સમસ્તં યેનાદૌ સૃષ્ટં દુષ્ટવધાત્પુનઃ ।
ત્રાતં યત્ર જગલ્લીનં તં નમામિ જનાર્દનમ્ ॥ ૯॥

ભક્તૈરભ્યર્ચિતો યસ્તુ નિત્યં ભક્તપ્રિયો હિ યઃ ।
તં દેવમમલં દિવ્યં પ્રણમામિ જગત્પતિમ્ ॥ ૧૦॥

દુર્લભં ચાપિ ભક્તાનાં યઃ પ્રયચ્છતિ તોષિતઃ ।
તં સર્વસાક્ષિણં વિષ્ણું પ્રણમામિ સનાતનમ્ ॥ ૧૧॥

નરસિંહપુરાણે અધ્યાય ૫૫ શ્લોક ૨-૧૨, અધ્યાય શ્લોક સંખ્યા ૨૦
શ્રીનરસિંહપુરાણે શુક્રવરપ્રદાનો નામ પઞ્ચપઞ્ચાશોઽધ્યાયઃ ॥ ૫૫॥

From Narasimhapurana adhyAya 55 verses 2-12
Proofread by Singanallur Ganesan singanallur at gmail.com

---

*Narasimha stuti by Shukracharya*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*